१ पितरस्य पत्रं

I पन्त-गालातिया-कप्पदकिया-आशिया-बिथुनियादेशेषु
प्रवासिनो ये विकीर्णलोकाः
II पितुरीश्वरस्य पूर्व्वनिर्णयाद् आत्मनः पावनेन
यीशुख्रीष्टस्याज्ञाग्रहणाय शोणितप्रोक्षणाय चाभिरुचितास्तान्
प्रति यीशुख्रीष्टस्य प्रेरितः पितरः पत्रं लिखति। युष्मान् प्रति
बाहुल्येन शान्तिरनुग्रहश्च भूयास्तां।
III अस्माकं प्रभो र्यीशुख्रीष्टस्य तात ईश्वरो धन्यः, यतः
स स्वकीयबहुकृपातो मृतगणमध्याद् यीशुख्रीष्टस्योत्थानेन
जीवनप्रत्याशार्थम् अर्थतो
IV ऽक्षयनिष्कलङ्काम्लानसम्पत्तिप्राप्त्यर्थम् अस्मान् पुन
र्जनयामास। सा सम्पत्तिः स्वर्गे ऽस्माकं कृते सञ्चिता तिष्ठति,
V यूयञ्चेश्वरस्य शक्तितः शेषकाले प्रकाश्यपरित्राणार्थं
विश्वासेन रक्ष्यध्वे।
VI तस्माद् यूयं यद्यप्यानन्देन प्रफुल्ला भवथ तथापि
साम्प्रतं प्रयोजनहेतोः कियत्कालपर्य्यन्तं नानाविधपरीक्षाभिः
क्लिश्यध्वे।
VII यतो वह्निना यस्य परीक्षा भवति तस्मात् नश्वरसुवर्णादपि
बहुमूल्यं युष्माकं विश्वासरूपं यत् परीक्षितं स्वर्णं तेन
यीशुख्रीष्टस्यागमनसमये प्रशंसायाः समादरस्य गौरवस्य च
योग्यता प्राप्तव्या।
VIII यूयं तं ख्रीष्टम् अदृष्ट्वापि तस्मिन् प्रीयध्वे साम्प्रतं तं न
पश्यन्तोऽपि तस्मिन् विश्वसन्तो ऽनिर्व्वचनीयेन प्रभावयुक्तेन
चानन्देन प्रफुल्ला भवथ,
IX स्वविश्वासस्य परिणामरूपम् आत्मनां परित्राणं लभध्वे च।

X युष्मासु यो ऽनुग्रहो वर्त्तते तद्विषये य ईश्वरीयवाक्यं
कथितवन्तस्ते भविष्यद्वादिनस्तस्य परित्राणस्यान्वेषणम्
अनुसन्धानञ्च कृतवन्तः।
XI विशेषतस्तेषामन्तर्व्वासी यः ख्रीष्टस्यात्मा ख्रीष्टे
वर्त्तिष्यमाणानि दुःखानि तदनुगामिप्रभावञ्च पूर्व्वं प्राकाशयत्
तेन कः कीदृशो वा समयो निरदिश्यतैतस्यानुसन्धानं कृतवन्तः।
XII ततस्तै र्विषयैस्ते यन्न स्वान् किन्त्वस्मान् उपकुर्व्वन्त्येतत्
तेषां निकटे प्राकाश्यत। यांश्च तान् विषयान् दिव्यदूता
अप्यवनतशिरसो निरीक्षितुम् अभिलषन्ति ते विषयाः साम्प्रतं
स्वर्गात् प्रेषितस्य पवित्रस्यात्मनः सहाय्याद् युष्मत्समीपे
सुसंवादप्रचारयितृभिः प्राकाश्यन्त।
XIII अतएव यूयं मनःकटिबन्धनं कृत्वा प्रबुद्धाः सन्तो
यीशुख्रीष्टस्य प्रकाशसमये युष्मासु वर्त्तिष्यमानस्यानुग्रहस्य
सम्पूर्णां प्रत्याशां कुरुत।
XIV अपरं पूर्व्वीयाज्ञानतावस्थायाः कुत्सिताभिलाषाणां
योग्यम् आचारं न कुर्व्वन्तो युष्मदाह्वानकारी यथा पवित्रो ऽस्ति
XV यूयमप्याज्ञाग्राहिसन्ताना इव सर्व्वस्मिन् आचारे तादृक्
पवित्रा भवत।
XVI यतो लिखितम् आस्ते, यूयं पवित्रास्तिष्ठत यस्मादहं
पवित्रः।
XVII अपरञ्च यो विनापक्षपातम् एकैकमानुषस्य
कर्म्मानुसाराद् विचारं करोति स यदि युष्माभिस्तात आख्यायते
तर्हि स्वप्रवासस्य कालो युष्माभि र्भीत्या याप्यतां।
XVIII यूयं निरर्थकात् पैतृकाचारात् क्षयणीयै रूप्यसुवर्णादिभि
र्मुक्तिं न प्राप्य
XIX निष्कलङ्कनिर्म्मलमेषशावकस्येव ख्रीष्टस्य बहुमूल्येन
रुधिरेण मुक्तिं प्राप्तवन्त इति जानीथ।
XX स जगतो भित्तिमूलस्थापनात् पूर्व्वं नियुक्तः किन्तु
चरमदिनेषु युष्मदर्थं प्रकाशितो ऽभवत्।

XXI यतस्तेनैव मृतगणात् तस्योत्थापयितरि तस्मै गौरवदातरि
चेश्वरे विश्वसिथ तस्माद् ईश्वरे युष्माकं विश्वासः प्रत्याशा
चास्ते।
XXII यूयम् आत्मना सत्यमतस्याज्ञाग्रहणद्वारा निष्कपटाय
भ्रातृप्रेम्ने पावितमनसो भूत्वा निर्म्मलान्तःकरणैः परस्परं गाढं प्रेम
कुरुत।
XXIII यस्माद् यूयं क्षयणीयवीर्य्यात् नहि
किन्त्वक्षयणीयवीर्य्याद् ईश्वरस्य जीवनदायकेन नित्यस्थायिना
वाक्येन पुनर्जन्म गृहीतवन्तः।
XXIV सर्व्वप्राणी तृणैस्तुल्यस्तत्तेजस्तृणपुष्पवत्। तृणानि
परिशुष्यति पुष्पाणि निपतन्ति च।
XXV किन्तु वाक्यं परेशस्यानन्तकालं वितिष्ठते। तदेव च
वाक्यं सुसंवादेन युष्माकम् अन्तिके प्रकाशितं।

II

I सर्व्वान् द्वेषान् सर्व्वांश्च छलान् कापट्यानीर्ष्याः
समस्तग्लानिकथाश्च दूरीकृत्य
II युष्माभिः परित्राणाय वृद्धिप्राप्त्यर्थं नवजातशिशुभिरिव
प्रकृतं वाग्दुग्धं पिपास्यतां।
III यतः प्रभु र्मधुर एतस्यास्वादं यूयं प्राप्तवन्तः।
IV अपरं मानुषैरवज्ञातस्य किन्त्वीश्वरेणाभिरुचितस्य
बहुमूल्यस्य जीवत्प्रस्तरस्येव तस्य प्रभोः सन्निधिम् आगता
V यूयमपि जीवत्प्रस्तरा इव निचीयमाना आत्मिकमन्दिरं
ख्रीष्टेन यीशुना चेश्वरतोषकाणाम् आत्मिकबलीनां दानार्थं
पवित्रो याजकवर्गो भवथ।
VI यतः शास्त्रे लिखितमास्ते, यथा, पश्य पाषाण एको ऽस्ति
सीयोनि स्थापितो मया। मुख्यकोणस्य योग्यः स वृतश्चातीव
मूल्यवान्। यो जनो विश्वसेत् तस्मिन् स लज्जां न गमिष्यति।

VII विश्वासिनां युष्माकमेव समीपे स मूल्यवान् भवति
किन्त्वविश्वासिनां कृते निचेतृभिरवज्ञातः स पाषाणः कोणस्य
भित्तिमूलं भूत्वा बाधाजनकः पाषाणः स्खलनकारकश्च शैलो
जातः।
VIII ते चाविश्वासाद् वाक्येन स्खलन्ति स्खलने च नियुक्ताः
सन्ति।
IX किन्तु यूयं येनान्धकारमध्यात् स्वकीयाश्चर्य्यदीप्तिमध्यम्
आहूतास्तस्य गुणान् प्रकाशयितुम् अभिरुचितो वंशो राजकीयो
याजकवर्गः पवित्रा जातिरधिकर्त्तव्याः प्रजाश्च जाताः।
X पूर्व्वं यूयं तस्य प्रजा नाभवत किन्त्विदानीम् ईश्वरस्य
प्रजा आध्वे। पूर्व्वम् अननुकम्पिता अभवत किन्त्विदानीम्
अनुकम्पिता आध्वे।
XI हे प्रियतमाः, यूयं प्रवासिनो विदेशिनश्च लोका इव मनसः
प्रातिकूल्येन योधिभ्यः शारीरिकसुखाभिलाषेभ्यो निवर्त्तध्वम्
इत्यहं विनये।
XII देवपूजकानां मध्ये युष्माकम् आचार एवम् उत्तमो भवतु
यथा ते युष्मान् दुष्कर्म्मकारिलोकानिव पुन र्न निन्दन्तः
कृपादृष्टिदिने स्वचक्षुर्गोचरीयसत्क्रियाभ्य ईश्वरस्य प्रशंसां
कुर्य्युः।
XIII ततो हेतो र्यूयं प्रभोरनुरोधात् मानवसृष्टानां कर्तृत्वपदानां
वशीभवत विशेषतो भूपालस्य यतः स श्रेष्ठः,
XIV देशाध्यक्षाणाञ्च यतस्ते दुष्कर्म्मकारिणां दण्डदानार्थं
सत्कर्म्मकारिणां प्रशंसार्थञ्च तेन प्रेरिताः।
XV इत्थं निर्ब्बोधमानुषाणाम् अज्ञानत्वं यत् सदाचारिभि
र्युष्माभि र्निरुत्तरीक्रियते तद् ईश्वरस्याभिमतं।
XVI यूयं स्वाधीना इवाचरत तथापि दुष्टताया वेषस्वरूपां
स्वाधीनतां धारयन्त इव नहि किन्त्वीश्वरस्य दासा इव।
XVII सर्व्वान् समाद्रियध्वं भ्रातृवर्गे प्रीयध्वम् ईश्वराद् बिभीत
भूपालं सम्मन्यध्वं।

XVIII हे दासाः यूयं सम्पूर्णादरेण प्रभूनां वश्या भवत केवलं
भद्राणां दयालूनाञ्च नहि किन्त्वनृजूनामपि।
XIX यतो ऽन्यायेन दुःखभोगकाल ईश्वरचिन्तया यत्
क्लेशसहनं तदेव प्रियं।
XX पापं कृत्वा युष्माकं चपेटाघातसहनेन का प्रशंसा? किन्तु
सदाचारं कृत्वा युष्माकं यद् दुःखसहनं तदेवेश्वरस्य प्रियं।
XXI तदर्थमेव यूयम् आहूता यतः ख्रीष्टोऽपि युष्मन्निमित्तं
दुःखं भुक्त्वा यूयं यत् तस्य पदचिह्नै र्व्रजेत तदर्थं दृष्टान्तमेकं
दर्शितवान्।
XXII स किमपि पापं न कृतवान् तस्य वदने कापि छलस्य कथा
नासीत्।
XXIII निन्दितो ऽपि सन् स प्रतिनिन्दां न कृतवान् दुःखं
सहमानो ऽपि न भर्त्सितवान् किन्तु यथार्थविचारयितुः समीपे स्वं
समर्पितवान्।
XXIV वयं यत् पापेभ्यो निवृत्य धर्म्मार्थं जीवामस्तदर्थं स
स्वशरीरेणास्माकं पापानि क्रुश ऊढवान् तस्य प्रहारै र्यूयं स्वस्था
अभवत।
XXV यतः पूर्व्वं यूयं भ्रमणकारिमेषा इवाध्वं किन्त्वधुना
युष्माकम् आत्मनां पालकस्याध्यक्षस्य च समीपं प्रत्यावर्त्तिताः।

III

I हे योषितः, यूयमपि निजस्वामिनां वश्या भवत तथा सति
यदि केचिद् वाक्ये विश्वासिनो न सन्ति तर्हि
II ते विनावाक्यं योषिताम् आचारेणार्थतस्तेषां प्रत्यक्षेण
युष्माकं सभयसतीत्वाचारेणाक्रष्टुं शक्ष्यन्ते।
III अपरं केशरचनया स्वर्णालङ्कारधारणोन
परिच्छदपरिधानेन वा युष्माकं वाह्यभूषा न भवतु,
IV किन्त्वीश्वरस्य साक्षाद् बहुमूल्यक्षमाशान्तिभावाक्षयरत्नेन
युक्तो गुप्त आन्तरिकमानव एव।

V यतः पूर्व्वकाले याः पवित्रस्त्रिय ईश्वरे प्रत्याशामकुर्व्वन् ता
अपि तादृशीमेव भूषां धारयन्त्यो निजस्वामिनां वश्या अभवन्।

VI तथैव सारा इब्राहीमो वश्या सती तं पतिमाख्यातवती
यूयञ्च यदि सदाचारिण्यो भवथ व्याकुलतया च भीता न भवथ
तर्हि तस्याः कन्या आध्वे।

VII हे पुरुषाः, यूयं ज्ञानतो दुर्ब्बलतरभाजनैरिव योषिद्भिः
सहवासं कुरुत, एकस्य जीवनवरस्य सहभागिनीभ्यताभ्यः
समादरं वितरत च न चेद् युष्माकं प्रार्थनानां बाधा जनिष्यते।

VIII विशेषतो यूयं सर्व्व एकमनसः परदुःखै र्दुःखिता भ्रातृप्रमिणः
कृपावन्तः प्रीतिभावाश्च भवत।

IX अनिष्टस्य परिशोधेनानिष्टं निन्दाया वा परिशोधेन
निन्दां न कुर्व्वन्त आशिषं दत्त यतो यूयम् आशिरधिकारिणो
भवितुमाहूता इति जानीथ।

X अपरञ्च, जीवने प्रीयमाणो यः सुदिनानि दिदृक्षते। पापात्
जिह्वां मृषावाक्यात् स्वाधरौ स निवर्त्तयेत्।

XI स त्यजेद् दुष्टतामार्गं सत्क्रियाञ्च समाचरेत्। मृगयाणश्च
शान्तिं स नित्यमेवानुधावतु।

XII लोचने परमेशस्योन्मीलिते धार्म्मिकान् प्रति। प्रार्थनायाः
कृते तेषाः तच्छ्रोत्रे सुगमे सदा। क्रोधास्यञ्च परेशस्य कदाचारिषु
वर्त्तते।

XIII अपरं यदि यूयम् उत्तमस्यानुगामिनो भवथ तर्हि को
युष्मान् हिंसिष्यते?

XIV यदि च धर्म्मार्थं क्लिश्यध्वं तर्हि धन्या भविष्यथ। तेषाम्
आशङ्कया यूयं न बिभीत न विङ्क्त वा।

XV मनोभिः किन्तु मन्यध्वं पवित्रं प्रभुमीश्वरं। अपरञ्च
युष्माकम् आन्तरिकप्रत्याशायास्तत्त्वं यः कश्चित् पृच्छति तस्मै
शान्तिभीतिभ्याम् उत्तरं दातुं सदा सुसज्जा भवत।

XVI ये च ख्रीष्टधर्म्मे युष्माकं सदाचारं दूषयन्ति ते
दुष्कर्म्मकारिणामिव युष्माकम् अपवादेन यत् लज्जिता
भवेयुस्तदर्थं युष्माकम् उत्तमः संवेदो भवतु।
XVII ईश्वरस्याभिमताद् यदि युष्माभिः क्लेशः सोढव्यस्तर्हि
सदाचारिभिः क्लेशसहनं वरं न च कदाचारिभिः।
XVIII यस्माद् ईश्वरस्य सन्निधिम् अस्मान् आनेतुम्
अधार्म्मिकाणां विनिमयेन धार्म्मिकः ख्रीष्टो ऽप्येककृत्वः पापानां
दण्डं भुक्तवान्, स च शरीरसम्बन्धे मारितः किन्त्वात्मनः सम्बन्धे
पुन र्जीवितो ऽभवत्।
XIX तत्सम्बन्धे च स यात्रां विधाय काराबद्धानाम् आत्मनां
समीपे वाक्यं घोषितवान्।
XX पुरा नोहस्य समये यावत् पोतो निरमीयत तावद् ईश्वरस्य
दीर्घसहिष्णुता यदा व्यलम्बत तदा तेऽनाज्ञाग्राहिणोऽभवन्। तेन
पोतोनाल्पेऽर्थाद् अष्टावेव प्राणिनस्तोयम् उत्तीर्णाः।
XXI तन्निदर्शनञ्चावगाहनं (अर्थतः शारीरिकमलिनताया
यस्त्यागः स नहि किन्त्वीश्वरायोत्तमसंवेदस्य या प्रतज्ञा सैव)
यीशुख्रीष्टस्य पुनरुत्थानेनेदानीम् अस्मान् उत्तारयति,
XXII यतः स स्वर्गं गत्वेश्वरस्य दक्षिणे विद्यते स्वर्गीयदूताः
शासका बलानि च तस्य वशीभूता अभवन्।

IV

I अस्माकं विनिमयेन ख्रीष्टः शरीरसम्बन्धे दण्डं भुक्तवान् अतो
हेतोः शरीरसम्बन्धे यो दण्डं भुक्तवान् स पापात् मुक्त
II इतिभावेन यूयमपि सुसज्जीभूय देहवासस्यावशिष्टं
समयं पुनर्मानवानाम् इच्छासाधनार्थं नहि
किन्त्वीश्वरस्येच्छासाधनार्थं यापयत।
III आयुषो यः समयो व्यतीतस्तस्मिन्
युष्माभि र्यद् देवपूजकानाम् इच्छासाधनं

कामकुत्सिताभिलाषमद्यपानरङ्गरसमत्तताघृणार्हदेवपूजाचरणञ्चाकारि
तेन बाहुल्यं।

IV यूयं तैः सह तस्मिन् सर्व्वनाशपङ्के मज्जितुं न धावथ,
इत्यनेनाश्चर्य्यं विज्ञाय ते युष्मान् निन्दन्ति।

V किन्तु यो जीवतां मृतानाञ्च विचारं कर्त्तुम् उद्यतोऽस्ति तस्मै
तैरुत्तरं दायिष्यते।

VI यतो हेतो र्ये मृतास्तेषां यत् मानवोद्देश्यः शारीरिकविचारः
किन्त्वीश्वरोद्देश्यम् आत्मिकजीवनं भवत् तदर्थं तेषामपि सन्निधौ
सुसमाचारः प्रकाशितोऽभवत्।

VII सर्व्वेषाम् अन्तिमकाल उपस्थितस्तस्माद् यूयं सुबुद्धयः
प्रार्थनार्थं जाग्रतश्च भवत।

VIII विशेषतः परस्परं गाढं प्रेम कुरुत, यतः, पापानामपि
बाहुल्यं प्रेम्नैवाच्छादयिष्यते।

IX कातरोक्तिं विना परस्परम् आतिथ्यं कृरुत।

X येन यो वरो लब्धस्तेनैव स परम् उपकरोतृ, इत्थं यूयम्
ईश्वरस्य बहुविधप्रसादस्योत्तमा भाण्डागाराधिपा भवत।

XI यो वाक्यं कथयति स ईश्वरस्य वाक्यमिव कथयतु यश्च
परम् उपकरोति स ईश्वरदत्तसामर्थ्यादिवोपकरोतु। सर्व्वविषये
यीशुख्रीष्टेनेश्वरस्य गौरवं प्रकाश्यतां तस्यैव गौरवं पराक्रमश्च
सर्व्वदा भूयात्। आमेन।

XII हे प्रियतमाः, युष्माकं परीक्षार्थं यस्तापो युष्मासु वर्त्तते तम्
असम्भवघटितं मत्वा नाश्चर्य्यं जानीत,

XIII किन्तु ख्रीष्टेन क्लेशानां सहभागित्वाद् आनन्दत तेन
तस्य प्रतापप्रकाशेऽप्यानन्देन प्रफुल्ला भविष्यथ।

XIV यदि ख्रीष्टस्य नामहेतुना युष्माकं निन्दा भवति तर्हि यूयं
धन्या यतो गौरवदायक ईश्वरस्यात्मा युष्मास्वधितिष्ठति तेषां
मध्ये स निन्द्यते किन्तु युष्मन्मध्ये प्रशंस्यते।

XV किन्तु युष्माकं कोऽपि हन्ता वा चैरो वा दुष्कर्म्मकृद् वा
पराधिकारचर्च्चक इव दण्डं न भुङ्क्तां।

XVI यदि च ख्रीष्टीयान इव दण्डं भुङ्क्ते तर्हि स न
लज्जमानस्तत्कारणाद् ईश्वरं प्रशंसतु।

XVII यतो विचारस्यारम्भसमये ईश्वरस्य मन्दिरे युज्यते
यदि चास्मत्स्वारभते तर्हीश्वरीयसुसंवादाग्राहिणां शेषदशा का
भविष्यति?

XVIII धार्म्मिकेनापि चेत् त्राणम् अतिकृच्छ्रेण गम्यते।
तर्ह्यधार्म्मिकपापिभ्याम् आश्रयः कुत्र लप्स्यते।

XIX अत ईश्वरेच्छातो ये दुःखं भुञ्जते ते सदाचारेण स्वात्मानो
विश्वास्यस्रष्टुरीश्वस्य कराभ्यां निदधतां।

V

I ख्रीष्टस्य क्लेशानां साक्षी प्रकाशिष्यमाणस्य प्रतापस्यांशी
प्राचीनश्चाहं युष्माकं प्राचीनान् विनीयेदं वदामि।

II युष्माकं मध्यवर्त्ती य ईश्वरस्य मेषवृन्दो यूयं तं पालयत
तस्य वीक्षणं कुरुत च, आवश्यकत्वेन नहि किन्तु स्वेच्छातो न
व कुलोभेन किन्त्विच्छुकमनसा।

III अपरम् अंशानाम् अधिकारिण इव न प्रभवत किन्तु वृन्दस्य
दृष्टान्तस्वरूपा भवत।

IV तेन प्रधानपालक उपस्थिते यूयम् अम्लानं गौरवकिरीटं
लप्स्यध्वे।

V हे युवानः, यूयमपि प्राचीनलोकानां वश्या भवत
सर्व्वे च सर्व्वेषां वशीभूय नम्रताभरणेन भूषिता भवत,
यतः,आत्माभिमानिलोकानां विपक्षो भवतीश्वरः। किन्तु तेनैव
नम्रेभ्यः प्रसादाद् दीयते वरः।

VI अतो यूयम् ईश्वरस्य बलवत्करस्याधो नम्रीभूय तिष्ठत तेन
स उचितसमये युष्मान् उच्चीकरिष्यति।

VII यूयं सर्व्वचिन्तां तस्मिन् निक्षिपत यतः स युष्मान् प्रति
चिन्तयति।
VIII यूयं प्रबुद्धा जाग्रतश्च तिष्ठत यतो युष्माकं प्रतिवादी यः
शयतानः स गर्ज्जनकारी सिंह इव पर्य्यटन् कं ग्रसिष्यामीति
मृगयते,
IX अतो विश्वासे सुस्थिरास्तिष्ठन्तस्तेन सार्द्धं युध्यत,
युष्माकं जगन्निवासिभ्रातृष्वपि तादृशाः क्लेशा वर्त्तन्त इति
जानीत।
X क्षणिकदुःखभोगात् परम् अस्मभ्यं ख्रीष्टेन यीशुना
स्वकीयानन्तगौरवदानार्थं योऽस्मान् आहूतवान् स
सर्व्वानुग्राहीश्वरः स्वयं युष्मान् सिद्धान् स्थिरान् सबलान्
निश्चलांश्च करोतु।
XI तस्य गौरवं पराक्रमश्चानन्तकालं यावद् भूयात्। आमेन्।
XII यः सिल्वानो (मन्ये) युष्माकं विश्वास्यो भ्राता भवति
तद्वाराहं संक्षेपेण लिखित्वा युष्मान् विनीतवान् यूयञ्च यस्मिन्
अधितिष्ठथ स एवेश्वरस्य सत्यो ऽनुग्रह इति प्रमाणं दत्तवान्।
XIII युष्माभिः सहाभिरुचिता या समिति र्बाबिलि विद्यते सा
मम पुत्रो मार्कश्च युष्मान् नमस्कारं वेदयति।
XIV यूयं प्रेमचुम्बनेन परस्परं नमस्कुरुत। यीशुख्रीष्टाश्रितानां
युष्माकं सर्व्वेषां शान्ति र्भूयात्। आमेन्।

Sanskrit Bible (NT) in Devanagari Script (सत्यवेदः।)

New Testament in Sanskrit Language; printed in Devanagari Script

copyright © 2018 SanskritBible.in

Language: Sanskrit

Contributor: SanskritBible.in

Thank you for your interest in Sanskrit Bible.
Sanskrit Bible (NT) is freely available in 22 different scripts of your choice. This edition is in Devanagari script and is based on the Sanskrit translation of the Holy Bible published by Calcutta Baptist Missionaries in 1851. Please visit SanskritBible.in to learn more about Sanskrit Bible and to download various free Christian literature.

This translation is made available to you under the terms of the Creative Commons Attribution Share-Alike license 4.0.
You have permission to share and redistribute this Bible translation in any format and to make reasonable revisions and adaptations of this translation, provided that:

- You include the above copyright and source information.
- If you make any changes to the text, you must indicate that you did so in a way that makes it clear that the original licensor is not necessarily endorsing your changes.
- If you redistribute this text, you must distribute your contributions under the same license as the original.

Pictures included with Scriptures and other documents on this site are licensed just for use with those Scriptures and documents. For other uses, please contact the respective copyright owners.
Note that in addition to the rules above, revising and adapting God's Word involves a great responsibility to be true to God's Word. See Revelation 22:18-19.

2020-01-01

PDF generated using Haiola and XeLaTeX on 18 Apr 2025 from source files dated 29 Jan 2022
b86351f0-254a-576d-aa84-ea19df4455cb